# શ્રીનન્દકુમારાષ્ટકમ્

Hymn to Krishna as Nandakumar

sanskritdocuments.org

August 4, 2018

# Hymn to Krishna as Nandakumar

# શ્રીનન્દકુમારાષ્ટકમ્

## Sanskrit Document Information

Text title : nandkumaaraashhTakam

File name : nandakumara8.itx

Category : aShTaka, vishhnu, krishna, vallabhaachaarya, vishnu, puShTimArgIya

Location : doc_vishhnu

Author : vallabhAchArya

Transliterated by : N

Proofread by : N

Latest update : October 11, 2001, August 4, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 4, 2018

*sanskritdocuments.org*

Hymn to Krishna as Nandakumar

# શ્રીનન્દકુમારાષ્ટકમ્

સુન્દરગોપાલં ઉરવનમાલં નયનવિશાલં દુઃખહરં
વૃન્દાવનચન્દ્રમાનન્દકન્દં પરમાનન્દં ધરણિધરમ્ ।
વલ્લભઘનશ્યામં પૂર્ણકામં અત્યભિરામં પ્રીતિકરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૧॥

સુન્દરવારિજવદનં નિર્જિતમદનં આનન્દસદનં મુકુટધરં
ગુઞ્જાકૃતિહારં વિપિનવિહારં પરમોદારં ચીરહરમ્ ।
વલ્લભપટપીતં કૃતઉપવીતં કરનવનીતં વિબુધવરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૨॥

શોભિતમુખધુલં યમુનાકૂલં નિપટઅતૂલં સુખદતરં
મુખમણ્ડિતરેણું ચારિતધેનું વાદિતવેણું મધુરસુરમ્ ।
વલ્લભમતિવિમલં શુભપદકમલં નખરુચિ અમલં તિમિરહરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૩॥

શિરમુકુટસુદેશં કુઞ્ચિતકેશં નટવરવેશં કામવરં
માયાકૃતમનુજં હલધરઅનુજં પ્રતિહતદનુજં ભારહરમ્ ।
વલ્લભવ્રજપાલં સુભગસુચાલં હિતમનુકાલં ભાવવરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૪॥

ઇન્દીવરભાસં પ્રકટસુરાસં કુસુમવિકાસં વંશિધરં
હૃત્મન્મથમાનં રૂપનિધાનં કૃતકલગાનં ચિત્તહરમ્ ।
વલ્લભમૃદુહાસં કુઞ્જનિવાસં વિવિધવિલાસં કેલિકરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૫॥

અતિપરમપ્રવીણં પાલિતદીનં ભક્તાધીનં કર્મકરં
મોહનમતિધીરં ફણિબલવીરં હતપરવીરં તરલતરમ્ ।
વલ્લભવ્રજરમણં વારિજવદનં હલધરશમનં શૈલધરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૬॥

જલધરદ્યુતિઅઙ્ગં લલિતત્રિભઙ્ગં બહુકૃતરઙ્ગં રસિકવરં
ગોકુલપરિવારં મદનાકારં કુઞ્જવિહારં ગૂઢતરમ્ ।
વલ્લભવ્રજચન્દ્રં સુભગસુછન્દં કૃતઆનન્દં ભ્રાન્તિહરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૭॥

વન્દિતયુગચરણં પાવનકરણં જગદુદ્ધરણં વિમલધરં
કાલિયશિરગમનં કૃતફણિનમનં ઘાતિતયમનં મૃદુલતરમ્ ।
વલ્લભદુઃખહરણં નિર્મલચરણં અશરણશરણં મુક્તિકરં
ભજ નન્દકુમારં સર્વસુખસારં તત્ત્વવિચારં બ્રહ્મપરમ્ ॥ ૮॥

॥ ઇતિ શ્રીમહાપ્રભુવલ્લભાચાર્યવિરચિતં શ્રીનન્દકુમારાષ્ટકં સમ્પૂર્ણમ્ ॥

*Hymn to Krishna as Nandakumar*

pdf was typeset on August 4, 2018

Please send corrections to *sanskrit@cheerful.com*